Hanuman Ashtottara Shatanamavali

श्रीहनुमत्-अष्टोत्तरशतनामावलिः

NityaPaath
nityapaath.com/hanuman-108-names/

NAMES · नामावली

1 ॐ आञ्जनेयाय नमः।

2 ॐ महावीराय नमः।

3 ॐ हनूमते नमः।

4 ॐ मारुतात्मजाय नमः।

5 ॐ तत्त्वज्ञानप्रदायकाय नमः।

6 ॐ सीतामुद्राप्रदायकाय नमः।

7 ॐ अशोकवनिकाच्छेत्रे नमः।

8 ॐ सर्वमायाविभञ्जनाय नमः।

9 ॐ सर्वबन्धविमोक्त्रे नमः।

10 ॐ रक्षोविध्वंसकारकाय नमः।

11 ॐ परविद्यापरिहाराय नमः।

12 ॐ परशौर्यविनाशनाय नमः।

13 ॐ परमन्त्रनिराकर्त्रे नमः।

14 ॐ परयन्त्रप्रभेदकाय नमः।

15 ॐ सर्वग्रहविनाशिने नमः।

16 ॐ भीमसेनसहायकृते नमः।

17 ॐ सर्वदुःखहराय नमः।

18 ॐ सर्वलोकचारिणे नमः।

19 ॐ मनोजवाय नमः।

20 ॐ पारिजातद्रुमूलस्थाय नमः।

21 ॐ सर्वमन्त्रस्वरूपवते नमः।

22 ॐ सर्वतन्त्रस्वरूपिणे नमः।

23 ॐ सर्वयन्त्रात्मकाय नमः।

24 ॐ कपीश्वराय नमः।

25 ॐ महाकायाय नमः।

26 ॐ सर्वरोगहराय नमः।

27 ॐ प्रभवे नमः।

28 ॐ बलसिद्धिकराय नमः।

29 ॐ सर्वविद्यासम्पत्प्रदायकाय नमः।

30 ॐ कपिसेनानायकाय नमः।

31 ॐ भविष्यच्चतुराननाय नमः।

32 ॐ कुमारब्रह्मचारिणे नमः।

33 ॐ रत्नकुण्डलदीप्तिमते नमः।

34 ॐ सञ्चलद्वालसन्नद्धलम्बमानशिखोज्ज्वलाय नमः।

35 ॐ गन्धर्वविद्यातत्त्वज्ञाय नमः।

36 ॐ महाबलपराक्रमाय नमः।

37 ॐ कारागृहविमोक्त्रे नमः।

38 ॐ शृङ्खलाबन्धमोचकाय नमः।

39 ॐ सागरोत्तारकाय नमः।

40 ॐ प्राज्ञाय नमः।

41 ॐ रामदूताय नमः।

42 ॐ प्रतापवते नमः।

43 ॐ वानराय नमः।

44 ॐ केसरिसुताय नमः।

45 ॐ सीताशोकनिवारणाय नमः।

46 ॐ अञ्जनागर्भसम्भूताय नमः।

47 ॐ बालार्कसदृशाननाय नमः।

48 ॐ विभीषणप्रियकराय नमः।

49 ॐ दशग्रीवकुलान्तकाय नमः।

50 ॐ लक्ष्मणप्राणदात्रे नमः।

51 ॐ वज्रकायाय नमः।

52 ॐ महाद्युतये नमः।

53 ॐ चिरजीविने नमः।

54 ॐ रामभक्ताय नमः।

55 ॐ दैत्यकार्यविघातकाय नमः।

56 ॐ अक्षहन्त्रे नमः।

57 ॐ काञ्चनाभाय नमः।

58 ॐ पञ्चवक्त्राय नमः।

59 ॐ महातपसे नमः।

60 ॐ लङ्किनीभञ्जनाय नमः।

61 ॐ श्रीमते नमः।

62 ॐ सिंहिकाप्राणभञ्जनाय नमः।

63 ॐ गन्धमादनशैलस्थाय नमः।

64 ॐ लङ्कापुरविदाहकाय नमः।

65 ॐ सुग्रीवसचिवाय नमः।

66 ॐ धीराय नमः।

67 ॐ शूराय नमः।

68 ॐ दैत्यकुलान्तकाय नमः।

69 ॐ सुरार्चिताय नमः।

70 ॐ महातेजसे नमः।

71 ॐ रामचूडामणिप्रदाय नमः।

72 ॐ कामरूपिणे नमः।

73 ॐ पिङ्गलाक्षाय नमः।

74 ॐ वार्धिमैनाकपूजिताय नमः।

75 ॐ कवलीकृतमार्तण्डमण्डलाय नमः।

76 ॐ विजितेन्द्रियाय नमः।

77 ॐ रामसुग्रीवसन्धात्रे नमः।

78 ॐ महारावणमर्दनाय नमः।

79 ॐ स्फटिकाभाय नमः।

80 ॐ वागधीशाय नमः।

81 ॐ नवव्याकृतिपण्डिताय नमः।

82 ॐ चतुर्बाहवे नमः।

83 ॐ दीनबन्धवे नमः।

84 ॐ महात्मने नमः।

85 ॐ भक्तवत्सलाय नमः।

86 ॐ सञ्जीवननगाहर्त्रे नमः।

87 ॐ शुचये नमः।

88 ॐ वाग्मिने नमः।

89 ॐ दृढव्रताय नमः।

90 ॐ कालनेमिप्रमथनाय नमः।

91	ॐ हरिमर्कटमर्कटाय नमः।
92	ॐ दान्ताय नमः।
93	ॐ शान्ताय नमः।
94	ॐ प्रसन्नात्मने नमः।
95	ॐ शतकण्ठमदापहृते नमः।
96	ॐ योगिने नमः।
97	ॐ रामकथालोलाय नमः।
98	ॐ सीतान्वेषणपण्डिताय नमः।
99	ॐ वज्रदंष्ट्राय नमः।
100	ॐ वज्रनखाय नमः।
101	ॐ रुद्रवीर्यसमुद्भवाय नमः।
102	ॐ इन्द्रजित्प्रहितामोघब्रह्मास्त्रविनिवारकाय नमः।
103	ॐ पार्थध्वजाग्रसंवासिने नमः।
104	ॐ शरपञ्जरभेदकाय नमः।
105	ॐ दशबाहवे नमः।
106	ॐ लोकपूज्याय नमः।
107	ॐ जाम्बवत्प्रीतिवर्धनाय नमः।
108	ॐ सीतासमेतश्रीरामपादसेवाधुरन्धराय नमः।

Text checked against: Gita Press, Gorakhpur: Shatanama Stotra Sangrah (code 1850), stotras with namavalis. Meanings, audio and all scripts at nityapaath.com/hanuman-108-names/